नष्टत्वे अकुले स्थायिनोभयम्। कुलाख्ये जयिनो नित्यम् साम्यञ्चैव कुलाकुले”

**कुलनायिका** स्त्री॰तन्त्रोक्ते कुलैः सेव्ये नायिकाभेदे। शक्तिसाधनतन्त्रे १पटले तद्भेदादिकमुक्तं यथा “नटी कापालकी वेश्या रजकी नापिताङ्गना। ब्राह्मणी शूद्रकन्या च तथा गोपालकन्यका। मालाकारस्य कन्या च नव कन्याः प्रकीर्त्तिताः। विशेषवैदग्ध्ययुताः सर्वा एव कुलाङ्गनाः। रूपयौवनसम्पन्ना शीलसौभाग्यशालिनी। पूजनीया प्रयत्नेन ततः सिद्धिर्भवेद्ध्रुवा”। अत्र विशेषयति निरुत्तरतन्त्रे १४पटले। “नटी कापालिकी वेश्या रजकी नापिताङ्गना। योगिनी श्वपची शुण्डी भूमीन्द्रतनया तथा। गोपिनी माल्यकारस्य कन्या कार्यविभेदतः। चतुर्वर्णोद्भवा रम्या कापाली सा प्रकीर्त्तिता। पूजाद्रव्यं समालोक्य वेशाचरणमिच्छति। चतुर्वर्णोद्भवा रम्या सा वेश्या परिकीर्त्तिता। पूजाद्रव्यं समालोक्य रजोऽवस्थां प्रकाशयेत्। सर्ववर्णोद्भवा रम्या रजकी सा प्रकीर्त्तिता। पूजाद्रव्यं समालोक्य कुलजा वीरमाश्रयेत्। संत्यज्य पशुभर्त्तारं कर्म्म चाण्डालिनी स्मृता। विपरीतरता पत्यौ पात्रं या परिपृच्छति। सर्ववर्णोद्भवा रम्या सा शौण्डी परिकीर्त्तिता। सर्वदा यन्त्रसंस्कारो यस्यास्य परिजायते। भूमीन्द्रजा तु रम्याऽसौ सर्ववर्णोद्भवा प्रिये!। आत्मानं गोपयेद्या च सर्वदा पशुसङ्कटे। सर्ववर्णोद्भवा रम्या गोपिनी सा प्रकीर्त्तिता। पूजाद्रव्यं समालोक्य या मालां परिकीर्त्तयेत्। सर्ववर्णोद्भवा रम्या मालिनी सा प्रकीर्त्तिता”। वेश्याया विशेषस्तु तत्रैवोक्तः। “गुप्तवेश्या महावेश्या कुलवेश्या महोदया। राजवेश्या देववेश्या ब्रह्मवेश्या च सप्तधा। कुलजा गुप्तवेश्या स्यात् निर्लज्जा मदनातुरा। पशुभर्त्राश्रिता लोके गुप्तवेश्या प्रकीर्त्तिता। कुलजा कुलवेश्या स्यात् महावेश्या प्रकीर्त्तिता। भगलिङ्गकलाभिश्च चुम्बयेच्च पुनः पुनः। एवंविधा कुलीना चेत् ब्रह्मवेश्या प्रकीर्त्तिता। दिव्यशक्तिर्वीरशक्तिस्तासां सङ्गे प्रकीर्त्तिता। चतुर्वर्णोद्भवानाञ्च सङ्गिताः परिभाषिताः। वेश्यावद्भ्रमते यस्मात् तस्माद्वेश्या प्रकीर्त्तिता। वर्णसङ्करतो जाता सर्ववेश्या प्रकीर्त्तिता”। कुलकामिन्यादयोऽप्यत्र

**कुलनाश** पु॰ ६त॰। १कुलध्वंसे तत्कारणं कुलशब्दे उक्तम् तदभावकारणञ्च “यावच्च वेदधर्म्माः स्युर्यावत् स्याच्छङ्करार्च्चनम्। यावत् स्याच्छुचि कथ्यञ्च तावन्न कुलनाशनम्। कुलं भूलग्नं नाश्नाति न+अश+अच् सुप् सुपेति समासः। २उष्ट्रे पुंस्त्री॰ हेमच॰ तस्योन्नतकन्धरतया उन्नत प्रदेशस्थकण्टकादेर्भक्षणाद्भूलग्नादेरभक्षणेन तथात्वम् स्त्रियां जातित्वात् ङीष्।

**कुलनाशन** न॰ कुलं नाशयत्यनेन नश—णिच्—करणे ल्युट्। वंशध्वंससाधने। “मुसलं कुलनाशनम्। यथा च मुसलेन वृष्णिप्रभृतिकुलनाशनं तथा भा॰मौ॰१अ॰उक्तं यथा “विश्वामित्रञ्च कण्वञ्च नारदञ्च तपोधनम्। सारणप्रमुखा वीरा ददृशुर्द्वारकां गतान्। ते तान् शाम्बं पुरस्कृत्य भूषयित्वा स्त्रियं यथा। अब्रुवन्नुपसङ्गम्य दैवदण्डनिपीडिताः। इयं स्त्री पुत्रकामस्य बभ्रोरमिततेजसः। ऋषयः साधु जानीत किमयं जनयिष्यति। इत्युक्तास्ते तदा राजन् विप्रलम्भप्रधर्षिताः। प्रत्यब्रुवंस्तान्मुनयो यत्तच्छृणु नराधिप!। वृष्ण्यन्धकविनाशाय मुसलं घोरमायसम्। वासुदेवस्य दायादः शाम्बोऽयं जनयिष्यति। येन यूयं सुदुर्वृत्ता नृशंसा जातमन्यवः। उच्छेत्तारः कुलं कृत्स्नमृते रामजनार्द्दनौ। समुद्रं यास्यति श्रीमांस्त्यक्त्वा देहं हलायुधः। जरा कृष्णं महात्मानं शयानं भुवि भेत्स्यति। इत्यब्रुवंस्ततो राजन्! प्रलब्धास्तैर्दुरात्मभिः। मुनयः क्रोधरक्ताक्षाः समीक्ष्याथ परस्परम्। तथोक्त्वा मुनयस्ते तु ततः केशवमभ्ययुः। अथाब्रवीत्तदा वृष्णीन् श्रुत्वैवं मधुसूदनः। अन्तज्ञो मतिमांस्तस्य भवितव्यं तथेति तान्। एवमुक्त्वा हृषीकेशः प्रविवेश पुरन्तदा। कृतान्तमन्यथा नैच्छत् कर्त्तुं स जगतः प्रभुः। श्वोभूतेऽथ ततः शाम्बो मुसलं तदसूत वै। येन वृष्ण्यन्धककुले पुरुषा भस्मसात्कृताः। वृष्ण्यन्धकविनाशाय किङ्करप्रतिमं महत्। असूत शापजं घोरं तच्च राज्ञे न्यवेदयन्। विषमरूपस्तद्राजा सूक्ष्मं चूर्णमकारयत्। तच्चूर्णं सागरे चापि प्राक्षिपन् पुरुषा नृप!” चूर्णीकृतस्य तस्य समुद्रे एरकाभावमुक्त्वा एरकाभूतेन मुसलेन ३अ॰ परस्परनाशोवर्णितः यथा “ते तु पानमदाविष्टाश्चोदिताः कालधर्मणा। युयुधानमथाभ्यघ्नन् छिष्टैर्भाजनैस्तदा। हन्यमाने तु शैनेये क्रुद्धो रुक्मिणिनन्दनः। तदनन्तरमागच्छन्मोक्षयिष्यन् शिनेः सुतम्। स भोजैः सह संयुक्तः सात्यकिश्चान्धकैः सह। व्यायच्छमानौ तौ वीरौ बाहुद्रविणशालिनौ। बहुत्वान्निहतौ तत्र उभौ कृष्णस्य पश्यतः। हतं दृष्ट्वा तु शैनेयं पुत्रञ्च यदुनन्दनः। एरकाणान्तदा मुष्टिं